श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री यदुगिरीश सुप्रभातम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font. Our sincere thanks to Dr. Sri. R. Thirunarayanan of Srirangam and Ms. V. Vismaya of Melukote for their help in the preparation of this document.

श्रीः

श्रीमते रामानुजाय नमः

# ॥ श्री यदुगिरीश सुप्रभातम् ॥

श्रीमन् यदुक्षितिभृदीश ! हरे ! मुरारे !
नारायण ! प्रणतसंसृतितारकाङ्घ्रे !।
श्रीमन्दिरायतमनोज्ञविशालवक्षः !
श्रीयादवाचलपते ! तव सुप्रभातम्॥ १ ॥

आदौ कृते कमलजन्मनि सत्यलोके
त्वाऽभ्यर्च्य दत्तवति भोः स्वकुमारकाय !।
तेनावतीर्य वसुधाकृतसन्निधान !
श्रीयादवाचलपते ! तव सुप्रभातम्॥ २ ॥

इन्द्रानलान्तकनिरृत्यपयोऽधिराजैः
नित्यं समीरणधनाधिपशर्वमुख्यैः।
संसेव्यमानचरणाम्बुज दिव्यधामन् !
श्रीयादवाचलपते ! तव सुप्रभातम्॥ ३ ॥

श्रीसैन्यनायकपराङ्कुशनाथसूरि-
पद्माक्षरामयमुनार्यसुपूर्णवर्यैः।
श्रीलक्ष्मणाखिलवरार्यमदार्यमुख्यैः
नित्यार्चिताङ्घ्रिक ! विभो ! तव सुप्रभातम्॥ ४ ॥

अष्टाक्षराण्यपि सुतीर्थमिषेण वेद-
दर्भाब्जयादवपलाशपराशराद्यैः।
नारायणाच्युतपदाख्यसरिद्भिरुच्चैः
सेव्यत्पदाम्बुज ! यदूत्तम ! सुप्रभातम्॥ ५ ॥

क्षेत्रैः पटाश्मनरसिंहमहीध्रसंवि-
दश्वत्थताक्ष्र्यनयनादिवराहमुख्यैः।

www.prapatti.com

सीताटवीप्रभृतिभिश्श्रितदिव्यधामन् !
श्रीयादवाचलपते ! तव सुप्रभातम्॥ ६ ॥

मन्त्रार्थमुद्गिरति ते मम नाथ ! वक्षः
पादौ द्वयस्य परमार्थमुदाहरन्तौ।
श्लोकार्थमीश ! विवृणोति तवैष हस्तो-
ऽप्येवं समीरणयदूत्तम ! सुप्रभातम्॥ ७ ॥

यत्कौतुकं तव गजेन्द्रविपद्विनोदे
या च त्वरा द्रुपदजापरिपालने वा।
तद्रूपया त्वरितया भवसिन्धुमग्नं
मां तारयेह यदुशैलमणे ! प्रभातम्॥ ८ ॥

प्रातस्सुनिश्चलमतिर्यदुशैलबन्धोः
यो वा पठेदनुदिनं यदि सुप्रभातम्।
तस्मै विहङ्गगमनः कमलासहायः
नारायणः परगतिं सुलभां प्रसूते॥ ९ ॥

जय जय सुप्रभातमरविन्दविलोचन ! ते
जय जय यादवाद्रिशिखरोज्ज्वलदीप ! हरे !।
जय जय भाष्यकारकृतमङ्गळभक्तनिधे !
जय जय देवदेव ! विनतानभिनन्दय नः॥ १० ॥

श्रीकल्याणीविलसद्यदुगिरिनारायणार्थिकल्पतरो !।
सम्पत्कुमार ! भवते नित्यश्रीर्नित्यमङ्गळं भूयात्॥ ११ ॥

॥ इति श्री यदुगिरीश सुप्रभातं संपूर्णम्॥

www.prapatti.com